वर्षम् - ०२ अङ्कः - ०२
जनवरी-दिसम्बर, २०२०

शोधज्योतिः
ISSN-2350-0700

# "यदागमास्तद्गुणीभूतास्तद् ग्रहणेन गृह्यन्ते" परिभाषार्थविमर्शः

**प्रो. विनोद कुमार झा**[१]

## प्रस्तावना-

**प्र** तथा **नि** उपसर्गपूर्वकाद् 'दा' धातोः णिच्-प्रत्यये, तत्र अनुबन्धलोपे सति प्र नि दा+इ इत्यवस्थायाम् **"अर्त्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुग्णौ"**[२] इत्यनेन आकारस्य दा-धातोः पुगागमे, अनुबन्धलोपे **"सनाद्यन्ता धातवः"**[३] इत्यनेन 'दापि' इत्यस्य धातुसंज्ञायां लट्-लकारस्य प्रथमपुरुषैकवचने 'दापयति' रूपं सम्पन्नं भवति। अनन्तरं प्र नि दापयति इत्यत्र दाप् (दा) धातोः **"दाधा घ्वदाप्"**[४] सूत्रेण घु-संज्ञायां **"नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोति - देग्धिषु च"**[५] इत्यनेन घुसंज्ञके दापि परे उपसर्गस्थनिमित्तात् रेफात् परस्य नकारस्य स्थाने णकारे कृते 'प्रणिदापयति' रूपं सम्पन्नं भवति। अत्र प्रश्नः समुदेति यद् **आगमसमभिव्याहारे आगमविशिष्टस्यैवार्थवत्त्वम्**[६] (यत्र कस्यचिद् आगमो भवति तत्र आगमिनोऽर्थवत्ता आगमविशिष्ट एव तिष्ठति) इति नियमानुरोधेन प्रस्तुतोदाहरणे दा-धातोरर्थवत्ता दापि तिष्ठति। अस्य दुष्फलम् इदं भवति यद् दा-धातोर्जायमाना घु-संज्ञा दापो भवितुं न शक्नोति, कारणं **"दाधा घ्वदाप्"** इत्यनेन दा-रूपायाः धा-रूपायाश्च आनुपूर्व्या घु-संज्ञा भवति। आनुपूर्व्याः पाठो विशिष्टरूपोपादानत्वेन स्वीक्रियते। यत्रविशिष्टरूपोपादानत्वं भवति तत्र **"अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम्"**[७] इति परिभाषया अर्थवत एव ग्रहणं भवति। अस्यां परिस्थितौ अर्थवतो दा-रूपस्य प्राप्ता घु-संज्ञा दापो न भविष्यति यतोहि **दाप्** इति **दा** नास्ति। न च दाप्-घटकस्य दा-शब्दस्य दा-रूपत्वाद् घु-संज्ञा स्यादिति वाच्यम्, तस्य अर्थवत्त्वाभावात्। एवम्प्रकारेण दापोऽर्थवत्त्वेऽपि तस्य दा-रूपत्वाभावात् तथा दाप्-घटकस्य दा-शब्दस्य

---

[१] अध्यक्षः- व्याकरणविभागः, श्रीसोमनाथ-संस्कृत-विश्वविद्यालयः, वेरावलम्- ३६२२६६

[२] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/३/३६

[३] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/१/३२

[४] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/२०

[५] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ८/४/१७

[६] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, हिन्दीटीकायां पृष्ठसंख्या- ४१

[७] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, परिभाषासंख्या- १४

दा-रूपत्वेऽपि तस्य अर्थवत्त्वाभावाद् घु-संज्ञा भवितुं न शक्नोति। घु-संज्ञाऽभावे 'प्रणिदापयति' इत्यत्र नकारस्य स्थाने णकारो भवितुं न शक्नोति, किन्तु नकारस्य स्थाने णकारो यथा स्यात् तथैव परिभाषा स्वीक्रियते- **यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते।**

**परिभाषायाः सामान्यार्थः-** यम् उद्दिश्य आगमो विहितो भवति, स आगमः तस्य उद्देश्यस्य (आगमिनः) अवयवो भवति। अतः आगमिबोधकशब्देन आगमविशिष्टस्य ग्रहणं भवति।

**परिभाषाया विशिष्टार्थः- यदागमाः** इत्यस्मिन् शब्दे **यस्य आगमाः** एवम्प्रकारेण षष्ठी-तत्पुरुष-समासो वर्तते। अत्र षष्ठीविभक्तेरर्थ उद्देश्यत्वमस्ति। तस्माल्लिख्यते यत्- यम् उद्दिश्य आगमो विधीयते स आगमः **शास्त्रेण = "आद्यन्तौ टकितौ"**[१] इत्यादिशास्त्रैः तद्गुणीभूतः अर्थात् आगमिनोऽवयवत्वेन बोध्यते। यदा आगम आगमिनोऽवयवत्वेन बोध्यते तदा **तद्ग्रहणेन = तद्ग्राहकेण=तद्बोधकशब्देन**=आगमिबोधकशब्देन आगम **गृह्यते = बोध्यते।** आगमिनो ग्रहणेन आगमविशिष्टस्य ग्रहणे प्रकृतपरिभाषायाः **तद्गुणीभूताः** = तदवयवीभूता इत्यंशो बीजरूपेण = कारणरूपेण विद्यते। इयं व्यवस्था न केवलं शास्त्रे अपितु लोकेऽपि दृश्यते। यथा - देवदत्तस्य अङ्गाधिक्ये तद्विशिष्टस्यैव देवदेत्तशब्देन ग्रहणं भवति।

**प्रस्तुतोदाहरणे परिभाषायाः समन्वयः-** 'प्रणिदापयति' इत्यत्र दा-धातोः पुगागमे सति पुगागमो दा-धातोरवयवो भवति तथा च दा-धातुना पुगागमविशिष्टस्य दापो ग्रहणं भवति। एवम्प्रकारेण दापो घु-संज्ञा तत्प्रयुक्तश्च नकारस्य स्थाने णकारो भवति।

**पदकृत्यम्-** यम् उद्दिश्य आगमो विहितो भवति तस्य आगमिन आगमोऽवयवो भवति इति कथनेन प्रनिदारयति इत्यत्र 'दार्' इत्यस्य **"दाधा घ्वदाप्"** सूत्रेण घु-संज्ञा न भवति। कारणं दृ-धातोर्णिच्-प्रत्यये, तत्रानुबन्धलोपे दृ+इ इत्यवस्थायाम् **"अचो ञ्णिति"**[२] इत्यनेन वृद्धौ सत्याम् **"उरण् रपरः"**[३] इत्यनेन आकारस्य 'आर्' रूपेण रपरत्वेन उपस्थितिर्भवति। अतः अत्र आनिरूपितम् अवयवत्वं यद्यपि रेफे विद्यते किन्तु दानिरूपितम् अवयत्वं रेफे नास्ति, **आ** इति उद्दिश्य रेफविधानात्। अतः दा-शब्देन दारो ग्रहणाभावात् तस्य घु-संज्ञा भवितुं न शक्नोति।

न च दकारस्य अग्रे आकारस्य स्थितिरेव दात्वं कथ्यते। तद् दात्वं दार्-शब्देऽपि तिष्ठति एव, कारणम् आकारमुद्दिश्य एव रपरत्वं क्रियते, अतः **"यदागम..."** परिभाषाद्वारा आर् इत्यत्र आत्वम्

---

[१] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/४६

[२] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/२/११५

[३] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/१५

आगमिष्यति। तद् 'दार्' इत्यत्र दकारस्य अग्रे अस्त्येव, अतः 'दार्' इति 'दा' इति मत्वा तस्य **"दाधा घ्वदाप्"** सूत्रेण घु-संज्ञा कथन्न भवतीति वाच्यम्, **"आने मुक्"**[१] इति मुग्विधानसामर्थ्यात् **"यदागम..."** परिभाषाया अनित्यत्वेन प्रकृतस्थले प्रकृतपरिभाषाया अप्रवृतित्त्वात्।

**प्रकृतपरिभाषाया अनित्यत्वज्ञापनम् -** पच्-धातोः **"वर्तमाने लट्"**[२] इत्यनेन लटि, तत्र अनुबन्धलोपे **"लटः शतृशानचावप्रथमासमानाधिकरणे"**[३] इत्यनेन लटः स्थाने शानचादेशे, अनुबन्धलोपे **पच् + आन** इत्यवस्थायाम् आनः सार्वधातुकसंज्ञायाम्[४], शपि[५], तत्रापि अनुबन्धलोपे **पच् अ + आन** इति दशायां **पच् अ** इत्यस्य अङ्गसंज्ञायाम्[६], अङ्गस्याकारस्य मुगागमे, अनुबन्धलोपे **पच् अ म् + आन** इति दशायां स्वादिकार्ये कृते **पचमानः** इति रूपं सम्पन्नं भवति। **पचमानः** इत्यत्र **पच् अ म् + आन** इति दशायां प्रकृतपरिभाषया मुगागमविशिष्टस्य अकारस्य अर्थात् अमः अत्वात् **अम् + आ** इत्यनयोः स्थाने **"अकः सवर्णे दीर्घः"**[७] इत्यनेन सवर्णदीर्घे सति **पचमानः** इत्यस्य स्थाने **पचानः** इति रूपं स्यात्। सहैव **पचानः** इति रूपस्य मुमागमाभावेऽपि सवर्णदीर्घमात्रेण सिद्धिर्जायते। अस्यां परिस्थितौ मुगागमो व्यर्थीभूय ज्ञापयति यत् **"यदागम..."** परिभाषा अनित्या विद्यते। अर्थात् क्वचित् परिभाषायाः प्रवृत्तिर्भवति क्वचिच्च न भवति। प्रकृतस्थले परिभाषाया अप्रवृत्तित्वात् सवर्णदीर्घाभावे **पचमानः** रूपं सम्पन्नं भवति। प्रकृतपरिभाषाया अनित्यत्वादेव दीङ्-धातोः लिट्-लकारे, प्रथमपुरुषस्य एकवचने आवश्यके कार्ये कृते **दि दी + ए** इत्यवस्थायाम् **"दीङो युडचि क्ङिति"**[८] इत्यनेन युडागमे दिदीये रूपं सम्पन्नं भवति। अन्यथा युडागमविशिष्टस्य एकारस्य अर्थात् **ये** इत्यस्य प्रकृतपरिभाषाद्वारा एकारत्वात् **दि दी + ये** इत्यत्र **"इको यणचि"**[९] इत्यनेन यण्-सन्धिः स्यात्। एवमेव **जहार** इत्यत्र **ज हृ + अ** इत्यवस्थायाम् ऋकारस्य स्थाने वृद्धौ सत्यां तस्य **"उरण् रपरः"** इत्यनेन रपरत्वेन उपस्थितौ **आर्** इत्यस्य प्रकृतपरिभाषया आत्वात् **"आत औ णलः"**[१०] इत्यनेन अकारस्य स्थाने औकारः स्यात्। न च

---

१ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/२/८२

२ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/२/१२३

३ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/२/१२४

४ तिङ्शित्सार्वधातुकम्- ३/४/११३

५ कर्तरि शप्- ३/१/६८

६ यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्- १/४/१३

७ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/१/१०१

८ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/४/६३

९ पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/१/७७

१० पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/१/३४

उपर्युक्तस्थले आकारादिवर्णस्य वर्णान्तरं कथम् अवयवो भवितुं सम्भवतीति वाच्यम्, वचनेन अर्थात् **"उरण् रपरः", "आद्यन्तौ टकितौ"** प्रभृतिसूत्रद्वारा आरोपितावयवस्य अवयवसादृश्ये पर्यवसानात् = समावेशात्।

न च **"आने मुक्"** इत्यनेन मुग्विधानसामर्थ्यात् प्रकृतपरिभाषाया अनित्यत्वज्ञापनापेक्षया इदं ज्ञापनं कर्त्तव्यं यद् इयं प्रकृतपरिभाषा वर्णग्रहणे प्रवृत्तिर्नार्हति। वर्णग्रहणेन अत्र तात्पर्यं विद्यते वर्णमात्रवृत्तिधर्मस्य तथा च वर्णमात्रवृत्तिधर्मघटितधर्मस्य अतिदेशेन अर्थात् अनयोः वर्णधर्मयोः अतिदेशे एतत्परिभाषायाः प्रवृत्तिर्न भवतीति वाच्यम्, **"आने मुक्"** सूत्रस्थभाष्यासङ्गतेः। अत्र **"आने मुक्"** सूत्रस्थभाष्यासङ्गतेस्तात्पर्यम् एवम्प्रकारेण ज्ञातव्यं यत् प्रकृतमुग्विधायकशास्त्रस्य अर्थविचारक्रमे भाष्यकारः कथयति यत् अङ्गावयवस्य अकारस्य मुमागमः स्यादित्यर्थस्वीकारे **पचमानः** इत्यत्र **"तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकम् अनुदात्तम् अह्न्विङोः"**[1] सूत्रेण वाञ्छित अनुदात्तस्वरो न स्यात्। कारणम् **"तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकम् अनुदात्तम् अह्न्विङोः"** सूत्रेण अदन्तोपदिश्यमानात् परस्य सार्वधातुक-लकारस्य अनुदात्तस्वरो भवति। प्रकृतौ अङ्गावयवस्य अकारस्य मुगागमे सति तस्य कित्त्वाद् अन्तावयवरूपेण उपस्थितिर्भवति तथा च अकारस्य अदन्तत्वं विनष्टं भवति इत्याशङ्क्य भाष्यकृद् अग्रे वदति- **अदुपदेशभक्तस्तद्ग्रहणेन ग्रहिष्यते**।[2] अर्थात् अकारम् उद्दिश्य कृतो मुमागम अकारेण **"यदागम..."** परिभाषया ग्रहिष्यते। अस्यां परिस्थितौ वर्णमात्रवृत्तिधर्मस्य अत्वस्य अदन्तोपदिश्यमाने अतिदेशे अदन्तोपदिश्यमानत्वं वर्णमात्रवृत्तिधर्मेण अत्वेन युक्तं भवति। वर्णमात्रवृत्तिधर्मस्य अतिदेशे प्रकृपरिभाषाया अप्रवृत्तौ **अदुपदेशभक्तस्तद्ग्रहणेन ग्रहिष्यत** इति भाष्यस्य असङ्गतिर्भवति।

एवमेव वर्णमात्रवृत्तिधर्मघटितधर्मस्यापि अतिदेशे प्रकृपरिभाषाया प्रवृत्तिर्भवति। अत्र प्रमाणं वर्तते- कुर्वन्नास्ते इत्यत्र पूर्ववर्तिनं नकारं पदान्तत्वेन स्वीकृत्य तस्य णत्वनिषेधः। अस्य स्थलस्य स्पष्टीकरणम् एवम्प्रकारेण ज्ञातव्यं यत् **"ङमो ह्रस्वादचि ङमुण्नित्यम्"**[3] इति सूत्रस्य अर्थनिर्धारणस्य एकस्मिन् पक्षे भाष्यकारो भणति यद् अनेन सूत्रेण- ङमन्तपदस्य अवयवस्तथा च ह्रस्वात्परो यो ङम् तस्य ङमुडागमो भवति। एतदर्थानुरोधेन **कुर्वन्+आस्ते** इति स्थितौ ङमन्तपदस्य अवयवभूतस्य ह्रस्वात् परस्य ङमः नकारस्य नुडागमे अनुबन्धलोपे च **कुर्वन् न् आस्ते** इत्यत्र परवर्तिनो नकारस्य पदान्तत्वेन तस्य **"पदान्तस्य"**[4] सूत्रेण णत्वनिषेधेऽपि पूर्ववर्तिनो नकारस्य **"अट्कुप्वाङ्नुम्व्यवायेऽपि"**[1] इत्यनेन णत्वं

---

[1] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/१/१८६

[2] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले पृष्ठसंख्या- ४४

[3] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ८/३/३२

[4] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ८/४/३७

णत्वं कथं न भवति, इत्याशङ्क्य उत्तरयति भाष्यकारः- पूर्ववर्तिनः नकारस्यापि **"यदागम..."** परिभाषया पदान्तत्वात् तस्य **"पदान्तस्य"** सूत्रेण पदान्तनिषेधो भविष्यति। अत्र वर्णो विद्यते परवर्ती नकारः तन्नकारवृत्तिधर्मो विद्यते नत्वम्, वर्णमात्रवृत्तिनत्वधर्मघटितो धर्मो विद्यते पदान्तनत्वं तस्य पूर्ववर्तिनि नकारे अतिदेशः क्रियते, अत एव णत्वनिषेधो भवति। अनेनेदं सिद्धं भवति यत् वर्णमात्रवृत्तिधर्मघटितधर्मस्यापि अतिदेशे **"यदागम..."** परिभाषायाः प्रवृत्तिर्भवति एव। एवम्प्रकारेण वर्णग्रहणे प्रकृतपरिभाषाया अप्रवृत्तेर्ज्ञापनं मुग्विधानसामर्थ्यात् कर्तुं न शक्यते। सहैव कुर्वन्नास्ते इति उदाहरणेन अत्र इदमपि ज्ञातव्यं यत् **"यदागम..."** परिभाषायाः प्रवृत्तिद्वारा आगमिबोधकशब्देन केवलस्य आगमस्य तथा च आगमविशिष्टस्य ग्रहणं भवति। एतत्सर्वं **"ङमो ह्रस्वादचि ङमुण्नित्यम्"** इति सूत्रस्य भाष्ये स्पष्टमस्ति।

किञ्च गुणादे रपरत्वे सति रेफविशिष्टे गुणत्वादीष्टं भवति। अन्यथा **ऋकारस्य गुणवृद्धी अरारौ भवतः** इति नियमो न स्यात्। वर्णग्रहणे प्रकृतपरिभाषाया अप्रवृत्तिस्वीकारे अरारादौ गुणत्वादि सिद्धं न भवति। अतः वर्णग्रहणे प्रकृतपरिभाषायाः प्रवृत्तिस्वीकारे **"रदाभ्याम्..."** सूत्रस्थं भाष्यं संगतिं प्राप्नोति यत् गुणो भवति, वृद्धिर्भवति इत्यनेन रेफावयवपरकः अर्, आर् गृह्येते। भाष्ये यथा- **'गुणो भवति वृद्धिर्भवतीति रेफशिरा गुणवृद्धिसंज्ञकोऽभिनिवर्त्तते'**।[२]

अत एव **"नेटि"**[३] सूत्रे इटिग्रहणं तथा **"णेरनिटि"**[४] सूत्रे अनिटिग्रहणं चरितार्थं भवति। यथा **कारयिता** इति उदाहरणे **कारि इ तृ** इत्यवस्थायां प्रकृतपरिभाषाया अभावे सर्वत्र अनिडादावेव आर्धधातुके प्रत्यये णिच इकारस्य लोपाय **"णेरनिटि"** सूत्रे अनिटिग्रहणं व्यर्थं भवति, तदेव अनिटिग्रहणं व्यर्थीभूय प्रकृतपरिभाषाया ज्ञापकं भवति। एवमेव **"नेटि"** सूत्रविषयेऽपि सर्वत्र अनिडादेः आर्धधातुकप्रत्ययस्य एव सत्त्वाद् इडादौ आर्धधातुके हलन्तलक्षणः वृद्धिनिषेधः[५] व्यर्थीभूय ज्ञापयति प्रकृतपरिभाषाम्।

न च **अनागमकानां सागमका आदेशाः**[६] (आगमरहितानां स्थाने आगमसहिता आदेशा भवन्ति) इति नियमानुरोधेन आर्धधातुकस्य इट्रहितस्य सिचः स्थाने सेटि सिजादेशे सेट् सिजादेशः

---

[१] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ८/४/२

[२] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले पृष्ठसंख्या- ४५

[३] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/२/४

[४] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ६/४/५१

[५] वदव्रजहलन्तस्याचः- ७/२/३

[६] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले पृष्ठसंख्या- ४६

स्थानिवद्भावेन आर्धधातुक इट्रहितः सिचो भविष्यति तथा च **"वदव्रजहलन्तस्याचः"** सूत्रेण प्राप्तायाः वृद्धेर्निषेधाय **"नेटि"** सूत्रस्य सार्थकता विद्यत एव कथं सूत्रमिदं व्यर्थीभूय प्रकृतपरिभाषाया ज्ञापकं भवितुं शक्नोतीति वाच्यम्, उपर्युक्तनियमस्य नित्यत्वरक्षणात्। अर्थात् अर्थापत्तिप्रमाणद्वारा (उपपाद्यद्वारा उपपादकस्य कल्पनेति अर्थापत्तिः) पारस्परिकविरोधनिदानाय अनागमकानां सागमका आदेशा भवन्तीति वाक्यान्तरकल्पना क्रियते। वैयाकरणानां नये शब्दो नित्यो विद्यते, अतः **"आर्धधातुकस्येड् वलादेः"**[१] सूत्रे वलादेरार्धधातुकस्य इडागमे सति शब्दस्य नित्यताया हानिर्भवति। अतः नित्यत्ववादिनो वैयाकरणा एतादृशीं बुद्धिं कुर्वन्ति। आदेशस्थल इव अनया कल्पनया शब्दस्य नित्यताया रक्षणं क्रियते। सहैव अत्र इदमपि ज्ञातं भवति यद् एतादृशस्थलेषु स्थानिवद्भावो न भवति। तस्मादत्र स्थानिवद्भावेन सेट् सिच् आर्धधातुकोऽनिट् सिच् न भवति।

न च शब्दस्य अनित्यताया वारणाय वौद्धिकविपरिणामस्वीकारेऽपि अस्य स्थाने इयं बुद्धिः कर्तव्या इत्येतावता कथनमात्रेणापि स्थान्यादेशभावः सुस्पष्ट एव। अत एव **"एरुः"**[२] इति सूत्रेण इकारान्तस्य 'ति' इत्यस्य स्थाने 'तु' इति उकारान्तबुद्धिः कर्तव्येति स्थान्यादेशभावकल्पनाद्वारापि **"स्थानिवदादेशोऽनल्विधौ"**[३] सूत्रस्य प्रवृत्तिर्भवत्येव येन 'भवतु' इत्यत्र तिङन्तता सिद्धा भवति। एवमेव **"नेटि"** सूत्रस्य उदाहरणेऽपि इड्विशिष्टे सिचि आर्धधातुकोऽनिट्सिच्बुद्धिद्वारा स्थानिवद्भावः सिद्धो भवति, अतः तत्र प्राप्ताया वृद्धेर्निषेधाय **"नेटि"** सूत्रस्य सार्थकता विद्यत एव तस्माद् व्यर्थीभूय सूत्रमिदं कथं प्रकृतपरिभाषाया ज्ञापनं कर्तुं शक्नोतीति वाच्यम्, **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे अर्थापत्तिमूलकवाक्येन बोधितस्य स्थान्यादेशभावस्य ग्रहणाभावात्। अतः इड्विशिष्टस्य सिचः स्थानिवद्भावद्वारा आर्धधातुकस्य अनिट्सिचोऽभावात् **"नेटि"** सूत्रस्य व्यर्थता विद्यत एव।

न च उपर्युक्तप्रकारकस्य स्थान्यादेशभावस्य **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे ग्रहणाभावे अस्य सूत्रस्य व्यर्थतेति वाच्यम्, अष्टाध्यायीद्वारा साक्षात्सूत्रबोधिते स्थान्यादेशभावस्य 'रामाय' इत्युदाहरणे प्रकृतसूत्रस्य चरितार्थत्वात्।

न च यथा घटस्य कृते व्यापारितं चक्षुः पटमपि पश्यति तथैव श्रौतस्थान्यादेशभावे चरितार्थतां प्राप्तं प्रकृतसूत्रं कल्पिते स्थान्यादेशभावेऽपि प्रवृत्तिमर्हतीति वाच्यम्, **"स्थानिवदादेशोऽनल्विधौ"** सूत्रस्य

---

[१] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/२/३५

[२] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ३/४/८६

[३] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/५६

स्थान्यादेशभावे **"निर्दिश्यमानस्यादेशा भवन्ति"**[१] परिभाषाया अप्रवृत्तित्वात्। अस्य स्थलस्य स्पष्टीकरणम् एवम्प्रकारेण ज्ञातव्यं यत् **"यदागम..."** परिभाषाद्वारा तथा च **"येन विधिस्तदन्तस्य"**[२] सूत्रद्वारा उपस्थाप्ये निर्दिश्यमानत्वं न तिष्ठति अर्थात् तत्र **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषायाः प्रवृत्तिर्भवति। अत एव **लावस्थायामेव अडि**[३]ति भाष्यसिद्धान्तानुरोधेन लावस्थायामेव अडागमे सति लुङ्-लकार-प्रथमपुरुष-एकवचनस्य **अपिबत्** इत्युदाहरणे अ पा अ+त् इत्यवस्थायाम् **"यदागम..."** परिभाषाद्वारा उपस्थाप्ये अडागमविशिष्टे **अपा** इत्यत्र **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषायाः प्रवृत्तिकारणात् **"पाघ्रा...शीयसीदाः"**[४] सूत्रेण केवलं 'पा' इत्यस्य 'पिब' आदेशो भवति। किन्तु **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण स्थानिवद्भावे सति तेन सूत्रेण उपस्थाप्ये निर्दिश्यमानत्वं तिष्ठति अर्थात् तत्र **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषायाः प्रवृत्तिर्न भवति। एवम्प्रकारेण प्रकृतस्थलेऽपि **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण अर्थापत्तिमूलके कल्पिते स्थान्यादेशभावस्वीकारे तत्र **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषाया अप्राप्त्या 'अपा' इत्यत्र निर्दिश्यमानत्वस्य सत्त्वात् तस्य स्थाने 'पिब' आदेशस्य प्राप्तिर्भवति तथा च अपिबत् इत्यस्य सिद्धिर्भवितुं न शक्नोति। अस्यां परिस्थितौ **लावस्थायामडि**ति भाष्योक्तसिद्धान्तस्य असङ्गतापत्तिर्जायते।

न च **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण अर्थापत्तिमूलके कल्पिते स्थान्यादेशभावेऽपि निर्दिश्यमानत्वास्वीकारे अर्थात् **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषाया प्राप्तिस्वीकारे 'अपा' इत्यत्र 'पा' इत्यस्य निर्दिश्यमानस्य स्थाने 'पिब' आदेशेन न केवलम् **अपिबत्** इत्यस्य सिद्धिर्भवति अपितु **लावस्थायामडि**ति भाष्योक्तसिद्धान्तस्य सङ्गतिरपि जायत इति वाच्यम्, **'सकृद्गति'** न्यायेन समाधानपरभाष्यासङ्गतेः। यथा- **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण अर्थापत्तिमूलके कल्पिते स्थान्यादेशभावेऽपि निर्दिश्यमानत्वास्वीकारे अर्थात् **"निर्दिश्यमानस्यादेशा भवन्ति"** परिभाषाया प्राप्तिस्वीकारे **तिसृणाम्** इत्यस्य **त्रि+आम्** इत्यवस्थायां **त्रि**-शब्दस्य स्थाने त्रयादेशे[५] तिस्रादेशे[६] च प्राप्ते परत्वात्तिस्रादेशे सति तत्र तिस्रादेशे **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण अर्थापत्तिमूलकं कल्पितं स्थान्यादेशभावं स्वीकृत्य तत्र निर्दिश्यमानत्वास्वीकारे अर्थात् **"निर्दिश्यमानस्यादेशा भवन्ति"**

---

[१] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, परिभाषासंख्या- १२

[२] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/७२

[३] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले पृष्ठसंख्या- ४८

[४] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/३/७८

[५] त्रेस्त्रयः- ६/४/४८

[६] त्रिचतुरोः स्त्रियां तिसृचतसृ- ७/२/९९

परिभाषाया प्राप्तिस्वीकारे तिस्रादेशस्य त्रि-शब्दाभावात् तस्य स्थाने **"त्रेस्त्रयः"** इत्यनेन त्रयादेशस्य प्राप्तिरेव नास्ति। अतः त्रयादेशप्राप्तिरूदोषनिवारणाय भाष्यकारेण **"सकृद्गतौ विप्रतिषेधे यद्बाधितं तद्बाधितमेव"**[1] इति न्यायेन तिस्रादेशद्वारा बाधितस्त्रयादेशो बाधित एव स्यादिति प्रदत्तम् उत्तरम् असङ्गतिं भजते। यथा- **स्थानिवद्भावविषये 'निर्दिश्यमानस्य' इति परिभाषायाः प्रवृत्तौ तिसृणामित्यत्र परत्वात्तिस्रादेशे स्थानिवद्भावेन त्रयोदेशमाशङ्क्य 'सकृद्गति' न्यायेन समाधानपरभाष्यासङ्गतिः।**[2]

**प्रश्नः- भवतु** इत्यस्य साधकम् **"एरुः"** सूत्रे **एः** इत्यत्र स्थानषष्ठीनिर्देशात् तत्र स्थान्यादेशभावस्य प्रवृत्तिर्यद्यपि भवति तथापि इकारे तिङ्त्वस्य अभावे तत्स्थानिक उकारोऽपि तिङ् न भवति नैव च **भवतु** इति तिङन्तं भवति। आनुमानिके स्थान्यादेशभावे **ति** इत्यस्य स्थाने **तु** इत्यादेशे तिङ्त्वं तत्र सुलभं भवितुं शक्नोति, किन्तु आनुमानिकस्य स्थान्यादेशभावस्य **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे ग्रहणं न भवति। अतः अस्यां परिस्थितौ **भवतु** इत्यत्र पदत्वं कथं सम्भवति?

**उत्तरम्- "आर्धधातुकस्येड् वलादेः"**[3] सूत्रस्य स्थितिः **"एरुः"** सूत्रापेक्षया भिन्ना विद्यते। **आर्धधातुकस्य** इत्यत्र अवयवषष्ठी वर्तते तथा **एः** इत्यत्र स्थानषष्ठी वर्तते। तस्मात् **आर्धधातुकस्य** इत्यत्र स्थानिवद्भावाय स्थानषष्ठीं निर्मातुम् अर्थापत्तिमूलको वाक्यकल्पितः स्थान्यादेशभावो भवति। **"एरुः"** सूत्रघटकषष्ठी स्थानार्थबोधिका विद्यते। अत्र इकारस्य उकारस्य च तदन्ते लक्षणा अस्ति। अतः इकासन्तस्य स्थाने उकारान्तादेशरूपः स्थान्यादेशभावः स्पष्टो वर्तते। एतादृशः स्थान्यादेशभावः **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे गृह्यते। अतः **भवतु** इत्यत्र पदत्वं सिद्धमेव विद्यते।

न च श्रौतस्थान्यादेशभावे चरितार्थम् **"स्थानिवदादेशोऽनल्विधौ"** सूत्रं लक्षणालभ्ये स्थान्यादेशभावे प्रवृत्तं भवितुं न शक्नोतीति वाच्यम्, आदेशग्रहणं व्यर्थीभूय तेन **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे आदेशमात्रस्य ग्रहणात्। अर्थात् **"स्थानिवदादेशोऽनल्विधौ"** सूत्रस्य स्थाने यदि **"स्थानिवदनल्विधौ"** सूत्रं क्रियेत तथापि साकाँक्षत्वात् स्थानिपदेन आदेशपदस्य लाभसम्भवे **आदेश** इति पदं व्यर्थीभूय ज्ञापयति यत् **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे आदेशमात्रस्य ग्रहणं भवति। अतः साक्षाद् अष्टाध्यायीबोधितस्य स्थान्यादेशभावस्य **"स्थानिवदा..."** सूत्रे तु ग्रहणं भवति एव, किन्तु अर्थापत्तिमूलकस्य वाक्यकल्पितस्य स्थान्यादेशभावस्य ग्रहणं न भवति प्रकृतसूत्रे। कारणम् अस्य स्थान्यादेशभावस्य ग्रहणं बहुविलम्बेन भवति।

---

[1] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, परिभाषासंख्या- ४०

[2] श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेते परिभाषेन्दुशेखरे, मूले पृष्ठसंख्या- ४८

[3] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- ७/२/३५

न च **"स्थानिवदादेशोऽनल्विधौ"** सूत्रे अनुमानिकस्य स्थान्यादेशभावस्य ग्रहणे एको द्वितीयो दोषः समुदेति यत् पटु-शब्दात् णिच्-प्रत्यये[१], तत्र अनुबन्धलोपे, टि-भागस्य उकारस्य लोपे[२] **पट्+इ** इत्यवस्थायाम् **"अत उपधायाः"** सूत्रेण प्राप्ताया वृद्धेः निवारणाय पूर्वं स्थानवद्भावो भवति स्म, किन्तु अनुमानिके स्थान्यादेशभावस्वीकारे **पटु** इत्यस्य स्थाने **पट्** इति आदेशः स्वीकरिष्यते। अस्यां परिस्थितौ इदं सुस्पष्टं विद्यते यदयम् आदेशः अजादेशो न भूत्वा अज्झलादेशो विद्यते। अस्य फलस्वरूपम् अत्र **"अचः परस्मिन् पूर्वविधौ"**[३] सूत्रेण स्थानिवद्भावाद् उपधावृद्धेर्प्राप्तिर्भविष्यतीति वाच्यम्, अनुमानिकस्य स्थान्यादेशभावस्य कल्पनास्वीकारेऽपि श्रौतस्थान्यादेशभावस्य त्यागाभावात्। अतः श्रौतस्थान्यादेशभावं स्वीकृत्य अत्र **"अचः परस्मिन् पूर्वविधौ"** सूत्रेण स्थानिवद्भावाद् उपधावृद्धेर्प्राप्तिर्न भविष्यति तथा च **पटयति** रूपं सम्पन्नं भविष्यति।

अनेनेदं सिद्धं भवति यत् **"यदागम..."** परिभाषायाः तथा च **"स्थानिवदादेशोऽनल्विधौ"** सूत्रस्य विषयः पृथक् पृथक् विद्यते। अतः ये स्वीकुर्वन्ति **"यदागम..."** परिभाषाया गतार्थता **"स्थानिवदादेशोऽनल्विधौ"** सूत्रेण भविष्यति ते इदानीं परास्ताः। एतत्सर्वम् **"दाधाघ्वदाप्"** सूत्रस्य भाष्ये सुस्पष्टं विद्यते। अत्र उपर्युक्तप्रकारेण **"यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते"** परिभाषाया अर्थविमर्शः समाप्तिमेति।

## सन्दर्भग्रन्थसूचिः


१. श्री-विश्वनाथमिश्रस्य 'सुबोधिनी' हिन्दीव्याख्योपेतः **परिभाषेन्दुशेखरः**
प्रकाशक- चौखम्भा संस्कृत प्रकाशन, वाराणसी। पुनर्मुद्रित संस्करण-२००९

२. बालमनोरमा-तत्त्वबोधिनीसहिता **वैयाकरणसिद्धान्तकौमुदी**
प्रकाशक- मोतीलाल बनासीदास, दिल्ली, वाराणसी, पटना, पुनर्मुद्रण दिल्ली, १९७९

३. अष्टाध्यायी सूत्रानुक्रमणिका (App), Directed by- Prof. M. M. Jha, Developed by- Srujan Jha


[१] प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च (गणसूत्रम्)

[२] टेः- १/१/५७

[३] पाणिनीय-अष्टाध्यायी-सूत्रपाठः- १/१/५७